

श्री भवानीशङ्करत्रिवेदविरचितम्

मोक्षमूलरवैदुष्यम्

टकम्

[illegible]
[illegible]

Dr. B. N. Pandit, Sh-st
M. A. M. O.
Ph. D. in Kashmir Saivism

सरस्वती श्रुतिमहती महीयताम्

मोक्षमूलरवैदुष्यम्

(भाषानुवादसहितं टिप्पण्यादिभिः परिष्कृतं भूमिकया च सनाथितम् ऐतिहासिकं संस्कृत-नाटकम्)

प्रणेता

भवानी शङ्कर त्रिवेदी

शास्त्री, एम. ए., पी-एच. डी.

आर्य भारती

संस्कृत सजातीय भारोपीयार्यभाषा-संस्थानम्

जी-१८, दिलशाद कालोनी

दिल्ली-११००३२

प्रकाशकः—
आर्य भारती
जी-१८, दिलशाद कालोनी
दिल्ली-११००३२

© डा० भवानी शङ्कर त्रिवेदी

प्रथम संस्करणम् : १९८१

मूल्यम् : ग्रन्थालय-संस्करणम् मात्र ४०.०० रुपये
सामान्य-संस्करणम् मात्र २५.०० रुपये

एतत्पुस्तकं
मेहरचन्द लछमन दास
१, अन्सारी रोड, दरियागंज
नयी दिल्ली-११०००२,
इत्येतैरप्युपलभ्यते ।

मुद्रक : राजीव प्रिंटर्स, मौजपुर, दिल्ली-११००५३

आत्म-निवेदनम्

संस्कृतांग्लशर्मण्यफारसीत्यादि—संस्कृत सजातीय—भारोपीयार्यभाषाणां संस्कृतं केन्द्रीकृत्य 'विश्ववाव्याप्ता संस्कृत भाषा 'Sanskrit The Language of Languages इति ग्रन्थस्य, आसां भाषाणां तुलनात्मकपद्धत्या सरलया रीत्या-चाध्ययनाध्यापनाय स्वयंशिक्षकस्य च निर्माणे प्रसक्तेनानेन जनेन मोक्षमूलरस्य Lectures on Comperative Phylology सदृशैर्ग्रन्थजातैरधिगतं मार्ग-दर्शनम्। India What it can teach us इति पुस्तकेनास्य महात्मनोऽपूर्वां भारतभक्ति विज्ञाय तस्य सगृहीतनामधेयायाः पत्न्याः जार्जिनायाः Life and Letters of Max Mueler इति पुस्तकमपठम्। तत्र च वेदभक्तं नानोपायैर्वेद-माहिमानं व्यञ्जयन्तं मोक्षमूलरं स्वजीवनं वेदायार्पयितुञ्च प्रेरयन्तं श्री वनूफं विलोक्य, शिष्यैः परिवृतं कञ्चिदृषिमेव प्रत्यक्षमन्वभवम्। पुस्तकेऽस्मिन्नेता दृशानेवानेकान् प्रसंगान् पाठंपाठं मोक्षमूलरस्य संस्कृतसेवां नाटकरूपेणोपस्थाप यितुमुत्केनानेन संस्कृतसेवकेन यथामत्युपनिबद्धमिदं नाटकं सादरं विदुषां कर कमलेषु समर्प्यते।

शरत् पूर्णिमा,
संवत् २०३८
आर्य भारती
जी-१८, दिलशाद कालोनी
दिल्ली-११००३२

विदुषामाश्रवस्य
भवानीशङ्कर त्रिवेदस्य

नाटकमेतत् आकाशवाण्या दिल्लीकेन्द्रतः प्रसारितमभूत् ।

सहयोगः सौजन्यञ्च

केन्द्र-निदेशक : श्रीलः एम. एस. बत्रा

नाटक विभाग कार्यक्रम सञ्चालक : श्रीसत्यप्रकाश हिंदवाणः

निदेशिका : श्रीमती कमला रत्नम्

प्रस्तुतीकरण-सहायक : श्रीगोपाल सक्सेना

प्रमुख कलाकाराः सर्वश्री मधुर शास्त्री, बलदेवानन्द सागरः, विश्वनाथः, धरणीकान्त झा, दिनेश्वरः ।

मोक्षमूलराभिलषितायां

वाराणस्यां

सम्पद्यमाने

पंचम विश्व-संस्कृत-सम्मेलने

समवेतानां

समग्रविश्वस्य सुरभारतीसमुपासकानां

सम्माने

सादरम्

पात्र-परिचय

पुरुषपात्राणि

मोक्षमूलरः (मेक्समूलर, मूलरो वा)—नायक ।

स्वामिविवेकानन्दः —विश्वाख्यातो महात्मा ।

ब्रोकहाउसः—लाइपजिग्-विश्वविद्यालस्य संस्कृताचार्यः, मूलरस्य संस्कृताध्यापकः ।

बर्नूफः —पेरिस-विश्वविद्यालयस्य संस्कृताचार्यः मूलरस्य वेदगुरुः ।

रुडोल्फरॉथ—बर्नूफस्यान्यतमः शिष्यः, शर्मण्यो विख्यातो वेदविद्वान् ।

विल्सनः —ऑक्सफोर्ड विश्वविद्यालयस्य संस्कृताचार्यः मूलरस्य परमोहितैषी ।

केशवचन्द्रसेनः —ब्रह्मसमाजस्य विख्यातो नेता ।

स्टर्डी—विवेकानन्दस्य शिष्यः सहयोगी च ।

सूत्रधारः

(छात्राः, रामजी, श्यामजी, शिक्षकः, वैदिकः, पण्डा आदयोऽन्ये च)

स्त्रीपात्राणि

जार्जिना—मोक्षमूलरस्य पत्नी

माता— „ माता

अग्रजा— „ अग्रजा

सुता— „ पुत्री

विक्टोरिया— सम्राज्ञी

नटी

(श्रीमती किंग्स्ले, प्रतिहारी अन्याश्च)

SHRI SWAMI VIVEKANANDA WRITES

What an extraordinary man is Prof. Max Mueller ! I paid a visit to him, a few days ago.

The visit was really a revelation to me. That nice little house in its setting of a beautiful garden, the silver-headed sage, with a face calm and benign, and forehead smooth as a child's in spite of seventy winters, and every line in that face speaking of a deep-seated mine of spirituality somewhere behind; that noble wife, the helpmate of his life through his long and arduous task of exciting interest, overriding opposition and contempt, and at last creating a respect for the thoughts of the sages of ancient India—the trees, the flowers, the calmness, and the clear sky—all these sent me back in imagination to the glorious days of ancient India, the days of our Brahmarshis and Rajarshis, the days of the great Vanaprasthas, the days of Arundhatis and Vasishthas.

It was neither the philologist nor the scholar that I saw, but a soul that is every day realising its oneness with the Brahman, a heart that is every moment expanding to reach oneness with the Universal. Where othres lose themselves in the desert of dry details, he has struck the well-spring of life. Indeed his heartbeats have caught the rhythm of the Upanishads *tamevaikam janatha atmanam anya vacho vimuncatha* : "Know the Atman alone and leave off all other talk".

Although a world-moving scholar and philosopher, his learning and philosophy have only led him higher and higher to the realisation of the spirit, his *apara vidya* (lower knowledge). has indeed helped him to reach the *para vidya* (higher knowledge). This is real learning: *vidya dadati vinayam* : "Knowledge gives humility". Of what use is knowl edge if it does not show us the way to the Highest ?

And what love he bears towards India, I wish I had a hundredth part of that love for my own motherland! Endued with an extraordinary, and, at the same time, intensely active

mind, he has lived and moved in the world of Indian thought for fifty years or more, and watched the sharp interchange of light and shade in the interminable forest of Sanskrit literature with deep interest and heartfelt love, till they have all sunk into his very soul and coloured his whole being.

Max Mueller is a Vedantist of Vedantists. He has, indeed, caught the real soul of the melody of the Vedanta, in the midst of all its settings of harmonies and discords—the one light that lightens the sects and creeds of the world, the Vedanta, the one principle of which all religions are only applications.

It is a wonder that this Western sage does study and appreciate every new star in the firmament of Indian thought, before even the Indians realise its magnitude ?

"When are you coming to India ? Every heart there would welcome one who has done so much to place the thoughts of their ancestors in the true light," I said. The face of the aged sage brightened up—there was almost a tear in his eyes, a gentle nodding of the head, and slowly the words came out : "I would not return then; you would have to cremate me there." Further questions seemed an unwarrantable intrusion into realms wherein are stored the holy secrets of man's heart. Who knows but that it was what the poet has said :

taccetasa smarati nunam abodhapurvam
bhavasthirani jananantarasauhridani

"He remembers with his mind the friendships of former births, firmly rooted in his heart."

His life has been a blessing to the world; and may it be many, many years more, before he changes the psesent plane of his existence ?

From Complete Works of Swami Vivekananda,
Val IV, *Calcutta*, *1963*

प्रथमः अंकः

ॐ विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् ॥

(मन्त्रस्योत्तरार्धं क्रमशः मन्दी भवत । तत एव
चेतच्छ्लोकत्रयमुद्गच्छति ।)

वागर्थवरदा रम्या वागर्थव्यक्तरूपिणी।
भारूपा भारती भव्या श्रेयसे ऽस्तु सतां सदा ॥१॥

यूरोपीया जना येन राजानश्चाधिकारिणः।
भारतीयचरित्रेण प्रज्ञया परिचायिताः ॥२॥

सह सायणभाष्येण ऋग्वेदश्च प्रकाशितः।
मोक्षमूलरभट्टोऽयं विश्वं विजयतेतराम् ॥३॥

(नान्द्यन्ते सूत्रधारो नटी च)

सूत्रधारः —सुप्रभातमार्ये !

नटीः —भवतेऽपि सुप्रभातम्। नाट्यविशारद ! किमिदम्पुस्तकम् ? (पुस्तकमवलोक्य) अहोऽद्यत्वे खलु महात्मन आत्मकथानुशील्यते!

सूत्रधारः —सत्यम्। अस्यामात्मकथायां राष्ट्रपित्रा महात्मागान्धिना मेक्समूलरस्यैका कृतिः सविशेषं चर्चिता । पूज्यो बापुरत्र लिखति यन्मेक्समूलरस्य 'भारतमस्मान् किमुपदिशति' India what it can teach us इति पुस्तकमफ्रीकाप्रवासकाले मया सस्पृहं सोल्लासञ्च पठितम्।

नटीः —अथ च—

स्वराज्यमधिकारो मे जन्मसिद्धो हि वर्तते ।
अधिकारमिमं हर्तुं न शक्तः कोऽपि मानवः ॥४॥

इति महामन्त्रोद्घोषकस्य लोकमान्यतिलकस्य जीवनचरिते पठितं मया यन्मोक्षमूलरस्यावेदनमनुरुद्ध्यैव सम्राज्ञी विक्टोरिया तं (तिलकं) कारागारान्मोचयितुमादिदेश ।

सूत्रधारः —आं स्मृतम् । तस्यैव महाप्राणस्य मोक्षमूलरभट्टस्य जीवनमनुरुद्ध्य श्रीभवानीशंकरत्रिवेदग्रथितुवस्तुना मोक्षमूलरवैदुष्याभिधानेनाभिनवेन नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः । (**पृष्ठभूमौ सभाकलरवमध्ये वेदमन्त्रध्वनिरिव श्रूयते** ।) अहो मम विज्ञापनावसर एव किमेषः स्वरसंयोग इव श्रूयते । (**कर्णौ दत्वा**) आं ज्ञातम्—

एडीसनेन तत्कालमाविष्कारे नवे कृते ।
कर्तुं ध्वन्यंकितां पूर्वं स्वां वाचं विश्वमोहिनीम् ॥५॥

ग्रामोफोनस्य यन्त्रस्य, निर्मात्रा प्रार्थितो भृशम् ।
वेदमन्त्रं पठन्नास्ते भट्टोऽयं मोक्षमूलरः ॥६॥

(इति प्रस्तावना)

प्रथमं दृश्यम्

स्थानम्—लन्दन नगरे ग्रामोफोनयन्त्रनिर्मातृभिरायोजिता सभा । तत्र ध्वन्यङ्कनोपकरणजातैर्ग्रामोफोनादिकैश्च सहिता दृश्यन्ते जनाः ।

मोक्षमूलरः —(**यन्त्र-समक्षे**)

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमम् ।

आयोजकः —वेदज्ञवर ! अस्माकं ग्रामोफोनयन्त्रायाद्य सर्वप्रथमं भवता

स्वमुखेन वेदवाणीं व्याहृत्य ताञ्च ध्वन्यंकितां कारयित्वा बहूपकृता वयम्। अथ च भवतो मुखाद्वेदमन्त्रं श्रुत्वाद्य कृत-कृत्या जाताः।

मूलरः—स्वाभाविकमेवैतन्मह्यम्। यतो हि—

वेदार्पितञ्च वेदाढ्यं विद्यते मम जीवनम्।
ऋग्वेदप्रथमो मन्त्रः प्रोक्तोऽतः प्रथमं मया ॥७॥

आयोजकः—परं यूरोप एव निवसता भवतैतादृक् संस्कृतज्ञानं कथम-वाप्तमित्यस्ति जिज्ञासितम्।

मोक्षः—सत्यम्। एषा तु स्वाभाविकी सार्वत्रिकी च जिज्ञासा। तत् शृणुत। शर्मण्यदेशस्य लाइपजिग विश्वविद्यालये वर्षत्रयेण सम्पद्यमानायाः स्नातकोपाधिपरीक्षायाः प्रथम एव वर्षे संस्कृताध्ययनम्मे विचित्रयैव रीत्या समारब्धम्।

द्वितीय दृश्यम्

स्थानम्—लाइपजिग् विश्वविद्यालयस्य प्रांगणम्।

(छात्राः परस्परमालपन्त इतस्ततः विचरन्ति।)

प्रथमः—अस्मिन् विश्वविद्यालये नवागतो भाषाध्यापको ब्रोक्हाउसो नित्यमेव किञ्चिदाश्चर्यकरमसम्भाव्यञ्च वदति।

द्वितीयः—अद्य न जाने किमद्भुतं वक्ष्यति।

तृतीयः—(**अवलोक्य**) आगच्छत्येवायम्।

प्रथमः—त्रिंशद्वर्षीयस्यास्य प्राध्यापकस्याकृतिर्वेशभूषा च विचित्रैव।

द्वितीयः—सर्वेऽपि भाषाध्यापका एतादृशा एव दृश्यन्ते।

सर्वे—(**उपसृत्य**) सुप्रभातमाचार्यवर !

ब्रोकहाउसः—भवद्भ्योऽपि सुप्रभातम्। प्रियाश्च्छात्रा आगच्छन्तु मया सह।

प्रथमः—(**मन्दंमन्दम्**) किं करिष्यामोऽस्य कक्षायाम् ?

द्वितीयः—अद्यापि किञ्चिन्नवीनं भविष्यति।

(इति सर्वे तेन सह प्रविष्टाः कक्षायाम्)

ब्रोकहाउसः —प्रियाश्च्छात्राः ! युष्माभिरेतदवगन्तव्यं यदस्ति भारतस्यैका भाषा····

प्रथमश्छात्रः —अहो ! अस्ति भारतस्यापि काचिद्भाषा ?

ब्रोकहाउसः —संस्कृतमस्ति तन्नाम।

द्वितीयश्च्छात्रः —भवतु तस्याः किमपि नाम। किमस्माकं तया प्रयोजनम् ?

ब्रोकहाउसः —सा च संस्कृतभाषास्माकं ग्रीकलेटिनगॉथिकादीनां सर्वथा सदृशी अग्रजा च।

प्रथमश्छात्रः —(**मन्दंमन्दम्**) प्रतीयते यदद्यानेन किञ्चिदधिकमेव पीतं मधु।

ब्रोकहाउसः —(**स्वगतम्**) यथार्थं खल्वेष वदति। यतोहि—

सम्प्रत्यमरभारत्या दिव्यं पीतं मया मधु।
यदास्वाद्याधिगच्छन्ति निर्जरत्वं नरा इह ॥८॥

मूलरः —(**मन्दं मन्दम्**) अहं तावदेनं पृच्छामि। (**उच्चैः**) महानुभाव ! भारतन्तु अहितुण्डिकप्रायो देशोऽस्तीति श्रूयते। भारतस्य काचिद् भाषास्माकं ग्रीकलेटिन्यादिभिस्सह साम्यं वहतीति कथं स्वीकर्तव्यम् ?

ब्रोकहाउसः —प्रत्यक्षे किं प्रमाणम् ? एतदस्ति-र्बलिन विश्वविद्यालयस्य संस्कृताचार्येण श्री बॉप्प महाभागेन शर्मण्यभाषायामेव लिखितं भारतशार्मण्य-भाषाणां तुलनात्मकं व्याकरणम्। पश्यन्तु पठन्तु च।

मूलरः —बृहदाकारोऽयं ग्रन्थः। कथं पारयामो ग्रन्थमिमं पठितुम् ?

ब्रोकहाउसः —भवतु, भवतां विश्वासोपजननायासां भाषाणां समानानि धातुरूपाणि लिखामि। पश्यन्तु तावत्—

(**श्यामपट्टे लिखति**)

संस्कृते—

	अस्ति	स्तः	सन्ति
ग्रीक	···	···	···

प्रथमश्छात्रः —(**विहसन्**) पश्यन्तु, यस्या लिपिरेवैतादृशी सा भाषा न जाने कीदृशी स्यात्।

मूलरः —अहह अहह चित्रञ्चित्रमेतद्विचित्रम् । अथवा—

यादृशा भारतीया हि लिपिस्तेषाञ्च तादृशी ।
विचित्रादृष्टपूर्वैषा .शृङ्गपुच्छयुता लिपिः ।।६।।

द्वितीयः —बाढं बाढम् । लिपिः सा च शृङ्गपुच्छयुता ! (**इति सर्वे हसन्ति**)

ब्रोकहाउसः —(**साश्चर्यम्**) छात्राः किमेवमुपहसथ ? अथवा नायं वो दोषः । ममैवाविमृश्यकारितयाऽऽदावेव लिखितानि देवनागराक्षराणि । अधुनाहं संस्कृतग्रीकलेटिनशर्मण्यभाषासु 'अस्' धातोः समानानिरूपाणि रोमनाक्षरैर्लिखामि । पश्यन्तु—

(**इति भाषाचतुष्टयस्य रूपाणि रोमन लिप्यां लिखति ।**)

ब्रोकहाउसः —अवलोकितानि भवद्भिस्सर्वासु भाषासु समानानि रूपाणि । अधुना वदन्तु संस्कृतस्य यूरोपीयभाषाणाञ्चैक्यस्य विश्वासो जातो न वा ? मूलर ! त्वमेव वद ।

मूलरः —सत्यमेव, संस्कृतन्तु ग्रीकलेटिनभाषाभ्यां सर्वथा साम्यं वहतीति लक्ष्यते । अधुनात्वहमपि संस्कृतं पठिष्यामि ।

ब्रोकहाउसः —अवश्यमवश्यम् । प्रिय मूलर ! अहं जानामि यत्त्वं निर्धनोऽपि सन् परिश्रमशीलो मेधावी चासि । ग्रीकलेटिनभाषे त्वयाधीतचरे एव । अहञ्च ग्रीक्या लेटिन्यया च सह तुलनात्मकपद्धत्यैवं पाठयिष्यामि, येन स्वल्पेनैव कालेन संस्कृते कृतविद्यो भविष्यसि । ततश्च त्वयाऽस्य लाइपजिग् विश्वविद्यालयस्य यशोवर्धिष्यत इत्यप्यहं स्फुटं पश्यामि ।

सर्वे—श्री गुरो ! वयं सर्वेऽपि संस्कृतं पठिष्यामः । संस्कृतमवश्यं पठिष्यामः ।

(**इति निष्क्रान्ताः सर्वे**)

तृतीयं दृश्यम्

स्थानम्—डेस्साउ नगरे मोक्षमूलरस्य निष्कुटः ।

मूलरः —सस्वरं पठति--

त्वामालिख्य प्रणयकुपितां धातुरागैश्शिलाया—
मात्मानन्ते चरणपतितं यावदिच्छामि कर्तुम् ।

अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥

अग्रजाः—अनुज ! किं गायसि ?

मूलरः—मेघमेदुरमम्बरं दृष्ट्वा सहसैव मे मनसि मेघदूतपठनेच्छा जाता। अथवा क्व शर्मण्य देशस्य शीतमेघानामेकरूपता, क्व च कालिदासस्य नितान्तनीलोत्पलकान्तिसुभगः प्रभाप्रभिन्नाञ्जनाचलसन्निभस्सघनघनविलासः। अपि च—

विना वल्मीकमेघेन द्योतितेनोष्णरश्मिना।
रत्नच्छायं कथञ्चित्रं भवेदाखण्डलं धनुः ॥१०॥

अग्रजाः—सत्यमेव मधुरा संस्कृतभाषा। एकवारं तामेव गीतिकां पुनः श्रावय।

मूलरः—यथेच्छसि। (त्वामालिख्येत्यादि पद्यं पुनः पठति।)

अग्रजाः—हन्त ! अस्यार्थोऽपि मयाऽवगतः स्यात्।

मूलरः—अग्रजे ! एतदर्थमेव कालिदासविरचितस्यास्य मेघदूताख्यस्य गीतिकाव्यस्य शर्मण्यभाषायां पद्यानुवादः पूर्वमेव मया प्रारब्धः।

अग्रजाः—प्रियम्मे ! मेघदूतस्य त्वया शर्मण्यामनुवादोऽपि प्रारब्धः एतत्त्वतीव शोभनम्। अथ च प्रतीयते यत्-संस्कृतशर्मण्ययोरपि साम्यमस्ति ?

मूलरः—न केवलं साम्यं तादात्म्यमप्यस्ति। यथाहि—

शब्दा यथा—

संस्कृत	जर्मन	फारसी	आंग्ल
दाघः	टाख tagh	दाग़	day
नक्तम्	nacht	X	night
बुध्नः	बोडेन boden	बुनियाद	bottom

धातवोऽपि—

अस्ति	इस्ट ist		
सन्ति	ज़िन्ट sind	अस्त	is
धा(दधाति (डू)	tu:n	अन्द	
		दास्तन	do

एवमेव समस्ताः पारिवारिका मातृपितृस्वस्रादयः शब्दा, स्वाङ्गनामानि, सर्वनामानि, संख्यावाचकपदानि पशुपक्षिणाञ्च

नामानि, सर्वे धातवश्च संक्षेपतः सर्वासां भारतशर्मण्यभाषाणां सम्पूर्णः शब्दराशिः व्याकरणञ्च समानमेव। अनया तुलनात्मकरीत्यैव मया सत्वरमेवाधीता संस्कृत भाषा।

अग्रजाः —अधुना तु संस्कृतपिपठिषा जागृता मे मनस्यपि।

मूलरः —सोदरे अन्यदपि शृणु।

अग्रजाः —अहं किं शृण्वानि ?

'त्वया मद्वचनं श्राव्यं, श्रुत्वा चाप्यवधर्यताम्।'

मूलरः —कथय।

अग्रजाः —अनुज ! त्वन्तु जानास्येव यत्स्वयौवन एवासह्य वैधव्यदुःखभारमुद्वहन्त्यापि पूज्यजनन्याऽऽशैशवादेवावां कथञ्चित् पालितौ पोषितौ पाठितौ च। अपि चास्माकमस्य डेस्साउनगरस्य ड्यूकमहोदयेन प्रदत्तया स्वल्पयावृत्त्या त्वया च सर्वत्र प्रथमं स्थानं लब्ध्वा प्राप्तया छात्रवृत्त्याद्यावधि येनकेन-प्रकारेण निर्वाहो जातः। अधुना माता वाञ्छति (**विलोक्य**) अहो ! सा त्विहैवागच्छति।

मूलरः —(**सगद्गदम्**) अम्ब ! पश्येदम्मम पुस्तकम्।

माताः —वत्स ! किमेकं पुस्तकं पश्यानि ? तव तु बहूनि पुस्तकानि···

मूलरः —गृहीतं ते वचनं मातः। अयन्तु हितोपदेशइत्याख्यस्य संस्कृतपुस्तकस्य शर्मण्यभाषायां मया विहितोऽद्यत्व एव प्रकाशितश्चानुवादः। अत्रास्ति मम प्रियः श्लोकः। शृणु—

सर्वं करगतं तस्य सन्तुष्टं यस्य मानसम्।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः॥

(**चाटुकारितामिव कुर्वन्**) मम मधुरे मातः ! अधुनाहमिच्छामि····

माताः —त्वं किमिच्छसि इति त्वहं न जाने। परमहमिच्छामि यदधुना त्वं विंशतिवर्षदेशीयो युवकः स्नातकश्चासि। अतएव क्वचिदध्यापनं लब्ध्वादारिद्र्यंनोऽपसारय।

मूलरः —अत्र तु कोऽपि सन्देहोनास्तियत्कुत्रचिदध्यापको भूत्वाहं स्वस्य युवयोश्चोदरपूर्तिकरणे सक्षमो भविष्याभि, परं मातः ! तदा मम संस्कृतस्य किं भविष्यति ?

माताः —नास्ति मे किमपि प्रयोजनं संस्कृतेन। त्वयात्वधुना···

मूलरः —अम्ब ! त्वन्तु जानास्यैव यल्लाइपजिग्विश्वविद्यालयात् पी-एच. डी. इति स्नातकोपाधिं लब्ध्वा श्री बॉप्पमहाभागात्संस्कृतमधिकमध्येतुमहं बर्लिननगरमगच्छम्। तत्रैव मया

निर्णीतं यदधुना पेरिसविश्वविद्यालयस्य विख्यातवेदविदुषः श्रीबर्नूफमहाभागस्य समीपं गन्तव्यं संस्कृतज्ञानवैशिष्ट्य-सम्पादनाय । त्वदाशीर्वादग्रहणायैवाहं बर्लिनतोऽत्रागतः । अधुना यदि त्वमनुमन्यसे, पेरिसं प्रस्थातुमिच्छामि मातः !

माताः —पुत्र ! यदि तवैष एवाभिलाषस्तर्हि ममापि निर्णयं शृणु—

मूलरः —(स्वगतम्) माता न जाने किं वक्ष्यति ? (प्रत्यक्षम्) कथय मातः कथय । तवादेशो नतेन शिरसा पालनीयः ।

माताः —तव संस्कृतम्प्रतीदृशमुत्कटमनुरागमालोक्य मयाऽपि निश्चितम् । शृणु वत्स !

प्रत्यूहं नाचरिष्यामि संस्कृताध्ययने तव ।
गृहाणेदं धनं किञ्चित्पूर्णकामो भवाधुना ॥११॥

(इति द्रव्यपोट्टलिकां तस्मै प्रदातुमुद्युङ्क्ते ।)

मूलरः —(प्रहर्षितः सन्) सत्यमेवाम्ब ! आकृतिरिव तव स्वान्तमपि कमनीयं कोमलतरञ्च । परमेतद्द्रव्यं कुतः प्राप्तं त्वया ?

माताः —तव पूज्येन पित्रा विसृष्टमेतद् द्रव्यं मयाद्यावधि संरक्षितम् । सदुपयोगस्यास्य कालोऽयं सम्प्राप्त इति मत्वा न्यासमिमं तुभ्य-मर्पयामि । गृहाण वत्स ! गृहाण । तत् पाथेयमेतद् भविष्यति ।

मूलरः —(सगद्गदम्) अहो मम करुणावरुणालये स्नेहार्द्रहृदये मातः ! (इति तस्याः पादयोः पतति ।)

माताः —उत्तिष्ठ वत्स, उत्तिष्ठ । (तमुत्थाप्य परिष्वजति) पुत्र ! त्वमेव मे जीवनाधारोऽसि, अतएव यद्यपि त्वां देशान्तरं प्रेषितुं नोत्सहते मे मनस्तथापि यथाकामं पेरिसं प्रतिष्ठ । तत्र च—

बर्नूफसेवा विधिवद्विधेया स्थाप्यञ्च लक्ष्यं सततं समक्षे ।
अवाप्य पश्चादजरं यशोऽपि श्रेयश्च सौख्यञ्च लभस्व वत्स ।१२।

मूलरः —ईशप्रसादादाशीर्वादस्तवायममोघस्स्यात् । अथ च—

जीवने मे समग्रेऽपि सर्वत्र च सदैव च ।
तवाशीर्वाद एवायं पाथेयम्मे भविष्यति ।१३॥

तदधुनानुजानीहि मां ! मातः पेरिसं प्रस्थातुम् । प्रणमामि ते चरणौ । अग्रजे ! त्वामपि वन्दे ।

उभे —(सास्रम्) शिवास्ते पन्थानस्सन्तु ।

(इति निष्क्रान्ताः सर्वे)

इति प्रथमः अंकः

द्वितीयः अंकः

प्रथमं दृश्यम्

स्थानम्—पेरिसनगरे आचार्य बर्नूफस्य गृहाङ्गणम् ।

(ततः प्रविशतः मैक्समूलररुडोल्फरॉथौ)

रॉथः—मूलर ! प्रसन्न इव लक्ष्यसे ?

मूलरः – वयस्य ! आचार्यबर्नूफस्य ऋग्वेदप्रथममण्डलमधिकृत्य प्रवचनजातं श्रावं-श्रावं स्मारं-स्मारञ्च तथानन्दमग्नोऽहं यथा धनाभावजं क्षुत्पिपासाजन्यञ्च सर्वं क्लेशजातं विस्मृतमिव ।

रॉथः—एवमेवम् ।

मूलरः—मया कठकेनेशेत्युपनिषत्त्रयमधीतचरम् । विख्यात दार्शनिक शिलरमहोदयस्य कृते केनोपनिषद् शर्मण्यभाषायां मयानूदितापि । अतएव उपनिषत्तत्त्वमनुरुद्ध्य ह्यो होराद्वयं आचार्यस्य प्रवचनं श्रुत्वा प्रहर्षपरतन्त्रोऽभवम् । परं यदाचार्येण स्वप्रवचनान्ते 'किन्तु' इत्युक्तं, तदा मम मनसि जातं यद् ख्रिष्टीय संस्कारवशादधुना केनचिद् ग्रीकेनान्येन वा प्रतिपादितं तत्त्वं उपनिषद्भ्योऽपि श्रेष्ठतरमिति न प्रतिपादयेदाचार्यः । परमाचार्यस्तु मुहूर्तं ध्यानमग्न इवाभवत्ततश्च 'वेदाः' "अहा अनिर्वचनीयाः हि वेदाः ।" इत्येवावोचत् ।

मया तु स्नातककक्षायामधीतान् कांश्चिन्मन्त्रान्विहाय वेदस्य दर्शनमपि न कृतम् । तत्कथमहं जाने वेदमहिमानम् । परं श्रीगुरवः सत्यमेव वदन्तीति मन्ये ।

रॉथः—ऋग्वेदस्य कंचिद् अशं विहाय वेदास्तु कुत्रापि मुद्रिता न सन्ति । तथाप्यस्य पेरिसविश्वविद्यालयस्य ग्रन्थालये वेदानां पाण्डुलिपयो विद्यन्ते ! श्रीबर्नूफश्च तेषां प्रतिलिपिकरणे सम्पादने

च प्रवृत्तचरः।

मूलरः —सखे ! अस्माकं वेदविदाचार्यो बर्नूफोऽवेस्ताग्रन्थस्यापि पारंगतः।

रॉथः —सत्यं वदसि। बर्नूफमहोदयेन तु ईरानदेशीय 'दारा' प्रभृतिभिस्सम्राड्भिर्लिखितानां पारसीकाभिलेखानां कीलाक्षरैर्लिखिता पुरातना दुर्बोधा लिपिरपि पठिता। येन 'पुरातनपारसी भाषा संस्कृतस्यैवैका विभाषास्ति' इति सुस्पष्टं जातम्।

मूलरः —सत्यं वदसि। अपिच—

आचार्यबर्नूफेन यदधीतमनुष्ठितम्।
तत्सर्वमनुकर्तव्यमस्माभिः प्रयतात्मभिः।

(विलोक्य) अयं गोल्डस्टुकरोऽप्यागच्छति।
तदुपतिष्ठामस्तावदाचार्यचरणान् सहैव।

(इति निष्क्रान्तौ)

द्वितीयं दृश्यम्

स्थानम्—पेरिसनगरे आचार्य बर्नूफस्य सदनम्।

(ततः प्रविशति स्वसुताभिस्सेव्यमानो भूर्जपत्रताडपत्रनवपुरातनकर्गलपत्रादिभिर्निर्मितेन हस्तलिखितेन ग्रन्थप्रचयेन परिवृतः किञ्चिल्लिखन्नाचार्यो बर्नूफः।)

सर्वे — (**प्रविश्य**) प्रणमाम आचार्यचरणान्।

बर्नूफः —वैदुष्यमवाप्नुथ। प्रियाश्च्छात्रा भवन्तस्तु जानन्त्येव यत्तपस्स्वाध्यायनिरतैर्भारतीयैर्ब्रह्मविद्भिर्वेदाः सहस्रशोवर्षाणि सम्यग् रक्षिताः।

मूलरः —पुस्तकं विनैव, विनैव चान्येन केनापि लिखितरूपेण श्रुतिपरम्परया एवाद्यावधि वेदानां संरक्षणं सत्यमेवाश्चर्यकरम्। अपूर्वा खलु श्रवणस्मरणशक्तिः भारतीयानाम्।

बर्नूफः —परमद्यत्वे तु वेदानां विशेषतस्तद्भाष्याणां पाण्डुलिपयोः भारतेऽपि दुर्लभाः सन्ति। यूरोपीयसंस्कृतज्ञानां प्रेरणया प्रयत्नेनचांग्लदेशस्य फ्रान्सस्य च शासनेन सभाष्याणां वेदानां

पाण्डुलिपयो भारतादादाय स्वकीयेषु ग्रन्थालयेषु निवेशिताः। परं ग्रन्थालयस्थानां वेदानामुपयोक्तारस्त्वत्र न दृश्यन्ते, तदभावे चात्रापि ते कीटभोज्यतां यास्यन्तीति शंके।

मूलरः —एतद्विषये किं वयं किमपि कर्तुं न पारयामः ?

बर्नूफः —कथन्न पारयामः। पारयामो वयम्। अधुनास्माभिरेवं प्रयतितव्यं यथा वेदाः सभाष्यास्सुसम्पाद्य मुद्रापयित्वा च भारताय प्रत्यर्पिताः स्युः। तदर्थमेषो रूडोल्फरॉथोऽथर्वणे यजुषि च पूर्वमेव कृतप्रयत्नोऽस्ति। अथ चायं गोल्डस्टुकरोऽपि कार्येऽस्मिन्प्रवृत्तचरः। (रॉथस्टुकराववलोक्य) वत्सौ, युवां स्वकार्यमनुतिष्ठथः।

रॉथस्टुकरौ —यथादिशत्याचार्यः। (इति स्व-स्व ग्रन्थ-सम्पादने निरतौ)

बर्नूफः —वत्स मूलर! त्वं नवीनतमः कनिष्ठतमोऽपि च सन् योग्यतमोऽसि। अतएव तव जीवनं वेदायैव भवत्वित्यहं कामये। एवं कृत्वा त्वं मे परमः सहायको भविष्यसि।

मूलरः —वेदार्पितं मे जीवनम्, श्री गुरोराज्ञयाद्यप्रभृति।

बर्नूफः —वत्स! तव तु देवनागराक्षराणि सुन्दराणि सन्ति। त्वं स्वीयैः सुन्दरैरक्षरैर्मया सम्पादितस्य ऋग्वेद-प्रथममण्डलस्य सायणभाष्यसहितस्य प्रतिलिपिकरणे सन्नद्धो भव। तदर्थञ्च त्वं किंचित्पारिश्रमिकमप्यवाप्स्यसि, येन ते स्वल्पाहारव्यवस्था सुकरा स्यात्।

मूलरः —सन्नद्धोऽस्मि।

बर्नूफः —परं वेदकार्ये प्रवर्तनात्पूर्वं त्वया द्वे प्रतिज्ञे कर्तव्ये।

मूलरः —आज्ञापयतु गुरुदेव!

बर्नूफः —प्रथमन्तु सायणभाष्यस्य प्रतिलिपिं सम्पादनञ्च कुर्वता त्वयास्यैकापि पंक्तिर्न परिहर्तव्या, एकमप्यक्षरं न त्याज्यम्। अपरञ्च अस्मिन् वेदकार्ये प्रवृत्तेन त्वया धूम्रपानं न कर्तव्यम्।

मूलरः —गृहीतं श्रीगुरोर्वचनम्—

सायणीयस्य भाष्यस्य त्यक्ष्यामि नैकमक्षरम्।
वेदलेखनकार्ये मे वर्जितं धूम्रपाणकम् ॥२॥

बर्नूफः —वत्स! अहन्तु तथा प्रयतिष्ये यथाचिरेणैव त्वं स्वयमेव वेद-

भाष्यस्य सम्पादने सक्षमो भविष्यसि। पश्चाच्च त्वया लन्दन-नगरं गत्वा तत्रत्य इण्डिया-हाउस-ग्रन्थालये सुरक्षिताः वेदभाष्यस्य पाण्डुलिपयोऽपि द्रष्टव्याः। ताभिस्सह साक्ष्यं कृत्वा सायणभाष्यस्य पाठः सुनिर्धारितः स्यात्।

मूलरः—प्राध्यापक महाभाग, परमेतत्कार्यन्तु सुमहत् श्रमसमयव्यय-सापेक्षं वर्तते।

बर्नूफः—त्वं सत्यं वदसि। परमहमाशासे यत्त्वया सम्पादितस्य सायणभाष्यसहितस्य ऋग्वेदस्य मुद्रापणाय त्वमिंग्लैण्डदेशस्य ईस्टइण्डिया कम्पन्यानुदानं लप्स्यसे। अधुना-अधीतिबोधा-चरणप्रचारणपरैरस्माभिर्भाव्यम्।

मूलरः—ईशकृपया गुरोर्वचांस्यावितथानि स्युः।

बर्नूफः—एषा वेदाज्ञा सदा स्मरणीया—

'विद्या ह वै ब्राह्मणमाजगाम
गोपाय मा शेवधिष्टेऽहस्मि।'

तृतीयं दृश्यम्

स्थानम्—आक्सफोर्डविश्वविद्यालयस्य प्रांगणस्थो मोक्षमूलरावासः।

(ततः प्रविशति ससायणभाष्यस्य ऋग्वेदस्य खण्डत्रयेण, नानाविधाभिः पाण्डुलिपिभिः प्रूफपत्रैर्लेखिनीमसिपात्रादिभिश्च परिवृतः स्यन्दनस्थो मोक्षमूलरः।)

मूलरः—(**स्वगतम्**) रमणीयं खल्वाक्सफोर्डविश्वविद्यालयस्येदं प्राङ्गणम्। श्री बर्नूफमहोदयस्य सकाशादागत्यात्र निवसता मया द्वादशभिर्वर्षैः ससायणभाष्यस्य ऋग्वेदस्य मण्डलचतुष्टयं त्रिभिः खण्डैर्मुद्रापितम् (चिन्तामग्नोभूत्वा) परमस्य पञ्चम-मण्डलस्यसायणभाष्ये तु सन्ति कानिचिद्दुर्बोधानि स्थलानि (विचार्य) अथवा तेषां विषये श्रीमताचार्येण विल्सनमहोदयेन सह…

(ततः प्रविशत्याचार्यो विल्सनः].

विल्सनः—सुप्रभातम् ! प्रिय मोक्षमूलर !

मूलरः—(विलोक्य) भवतेऽपि सुप्रभातम्, मान्यवर ! स्मरणसमकालमेवात्रभवतां दर्शनं जातम्।

मूलरः—तत्रभवतः प्रशियाराजदूतस्य महामहिम्नो बुन्शेनमहोदयस्य महत्या प्रयत्नपरम्परया भवतश्च तस्य सततमनुमोदनेनैवेस्टइण्डिया कम्पनी भूरिव्ययसाध्यां ऋग्वेदप्रकाशनस्य मम योजनामङ्गीचकार। भारतात् सायणभाष्यस्य तत्रत्यैः पण्डितैः प्रतिलिपिं कारयित्वा तासामत्रानयेनाय च भगीरथः प्रयत्नो विहितः कम्पन्या। भगवत्प्रसादादेवेतदिति मन्ये।

विल्सनः—अद्भुतः प्रभावः श्रीबुन्शेनमहोदयस्येस्ट इण्डिया कम्पन्या निदेशकमण्डले। वेदानुरागोऽप्यस्यानुकरणीयः।

मूलरः—सत्यं वदत्यत्रभवान्। यतोहि–
"वत्स ! तव रूपेणाद्याहमेव पुनर्नवयुको जातइत्येवमनुभवामि। वेदप्रकाशनकार्यन्तु मया पूर्वं चिंतयित्वाप्यनारब्धमेवासीत्। यतो हि मिस्रदेशस्योत्खननैर्निर्गतयातुलया सम्पत्त्या तदात्वे मे चेतश्चोरितमभूत्" इत्यवोचद् वेदभाष्यप्रकाशनव्यवस्थां विधातुं मया प्रार्थितो मान्यो बुन्शेनमहाभागः।

विल्सनः—विद्वत्प्रवर ! सायणभाष्यस्य प्रामाणिकपाठनिर्धारणे पूर्वरूपाणां प्रूफानां वा पठनेऽहर्निशं व्यापृतं भवन्तमालोक्य मोमुद्यतेतरां मे चेतः। सायणभाष्यस्य सम्पादने घोरं तपस्तप्तं भवता। पूर्वं पेरिसेऽपि भाष्यप्रतिलिपिकरणे वर्षद्वयमेकीकृतं भवता। तत्र च—

यथालब्धेन भोज्येन स्वल्पाहारेण वा पुनः।
कृष्णां कॉफीञ्च पीत्वा वा शर्करादुग्धवर्जिताम्॥३॥
भाष्यलेखनकार्येऽस्मिन्व्यापृतेन निरन्तरम्।
सुप्त्वा निशि तृतीयस्यां कालो नीतस्त्वयाऽनघ॥४॥

मूलरः—गुरुदेवस्य श्रीबर्नूफस्याशीर्वादेनैव…

विल्सनः—अस्मिन्नाक्सफोर्ड विश्वविद्यालयीय मुद्रणालयेऽपि प्रत्येकमक्षरं स्वहस्तेन लिखित्वा वेदमुद्रणयोग्यं सीसकाक्षरमयं देवनागरी टाइपं निर्मापितं भवता।

मूलरः —आचार्यवर ! वाराणसीवासेच्छोपचीयते मे चेतसि। परं भारतीयांनां सैन्यविद्रोहं व्यपदिश्य नानुमतं मे भारतगमनं जनन्या। "अम्ब ! चिन्ता न कार्या भारतमस्माद् भूमण्डलाद्-वहिर्नास्ति। ईशछत्रच्छायया वाह्यन्तु नास्त्येवेति पुनर्लिखितं मया। तदुत्तरप्रतीक्षापरोऽहम्। अथचाद्यत्वे ऋग्वेदस्य खण्ड-त्रयमपि भारतीयैर्विद्वद्भिरासादितं स्यात्। तेषां प्रतिक्रिया न जाने कीदृशी स्यात्?

विल्सनः —सर्वं शोभनं सम्पत्स्यते। यतो हि—

प्रारब्धस्य प्रयत्नस्य फलाशापि प्रजायते।

श्रीमती किंग्सले —(**प्रविश्य**)

निश्चिता च फलप्राप्तिर्भविष्यति फलागमः।५।

मूलरः —(**विलोक्य सहर्षम्**) अहो किंग्स्लेदम्पती ! सुप्रभातम्।

श्री किंग्स्ले —सुप्रभातं भवद्भ्यामपि।

विल्सनः —चिराद्दृष्टावत्रभवन्तावद्य।

श्रीमती किंग्स्लेः —आचार्यप्रवर ! आगमनप्रयोजनमपि निवेदयामि। मोदमवाप्स्यत्यत्रभवानेतज्ज्ञात्वा यद्बहूनि वर्षाण्यूहापोहे निमज्जता ममाग्रजेन श्रीमता ग्रेम्फेलमहोदयेन युष्माकमनेन वेदज्ञमूलरेण सह स्व सुताया जार्जिनाया विवाहप्रस्तावः स्वीकृतः।

विल्सनः —प्रियं मे प्रियं मे। अयमस्माकं वेदसर्वस्वो मोक्षमूलरः—

'अकञ्चिनः सन् प्रभवोऽस्ति सम्पदाम्।'

श्री किंग्स्ले —कोऽत्र सन्देहः।

श्रीमती किंग्स्ले —वर्धतामत्रभवन्तौ।

विल्सनः —भवन्तावपि वर्धताम्।

(**इति निष्क्रान्ताः सर्वे**)

चतुर्थं दृश्यम्

स्थानम्—वाराणसी-चतुष्पथम्।

(**पृष्ठभूमौ विश्वनाथमन्दिरारार्तिक्ये पठितानां पुष्पाञ्जलिमन्त्राणां घण्टापटहादिनाञ्च ध्वनयः**)

(**ततः प्रविशतः शिक्षकवैदिकौ।**)

शिक्षकः —वैदिकवर ! यूरोपीयपण्डितानां विशेषतः शार्मण्य विप्राणा-

मेका वसतिः काश्यां सत्वरमेव निर्मास्यत इति श्रूयते ।

वैदिकः —धन्यास्ते । यतो हि—

पूर्वोपात्तैः पुण्यपुञ्जैः प्रभूतैः
श्रेयस्कामैर्लभ्यते काशिवासः ।६।

शिक्षकः —परमद्यत्वे तु—

'पण्डा सांड सीढ़ी संन्यासी, इनसे बचे तो सेवे काशी',
इति न्यायेन कष्टबहुलो जातः काशिवासः । अथ च—

श्रद्धालवोऽश्रद्धधानैर्धूर्तैर्धर्मपरायणाः ।
अपण्डितैश्च पण्डाभिर्मुण्डयन्ते तीर्थयात्रिणः ॥७॥

वैदिकः —(कर्णौ दत्वा) एष डिण्डिमनादः श्रूयते । तच्छृण्वाव तावत् —

उद्घोषकः —(**सडिण्डिमनादम्**) भो भो विद्वांसोऽन्ये च श्रोतारः ! अद्य खलु सायं पञ्चवादनावसरे नगरसभागारे आंग्लदेश वास्तव्येन शार्मण्येन श्रीमोक्षमूलर भट्टेन सम्पादितस्य ऋग्वेद सायण-भाष्यस्य प्रामाण्यनिर्धारणायैका विद्वत्सभा सम्पत्स्यते । तत्सर्वैस्तत्रोपस्थातव्यम् । (**पुनः डिण्डिमं वादयति**)

(**ततः प्रविशति अब्रह्मण्यमब्रह्मण्यमिति वदन् कश्चित् पण्डा**)

वैदिकः —अब्रह्मण्यमिति कथं प्रलपसि ? सुब्रह्मण्यमिति वद ।

पण्डा —सुब्रह्मण्यन्तु मद्रास·········

शिक्षकः —(**सस्मितम्**) सत्यमेव 'देवानांप्रिय' एवासि ।

पण्डा – (**सहर्षम्**) भवादृशानां कृपा वर्तते ।

वैदिकः —'अब्रह्मण्यम्' सुब्रह्मण्यमित्यनयोरर्थमपि जानासि ?

पण्डा—भाव! अत्रघाटे स्थितोऽहंप्रायेण शृणोमि यज्जाते कस्मिंश्चि-दनर्थे भवादृशाः पण्डिताः प्रायेण 'अब्रह्मण्यमब्रह्मण्यम्' वदन्ति । क्षम्यतां, नास्त्यर्थेन मे किमपि प्रयोजनम् ।

वैदिकः —अर्थदासस्य कथं नास्त्यर्थेन प्रयोजनम् ?

पंडा —अनयोः शब्दयोरर्थं न जानामीत्यस्ति मेऽभिप्रायः ।

शिक्षकः —तर्हि श्रोतव्यम्—ब्रह्मणेऽर्थाद्वेदाय यत्सुहितं तद् सुब्रह्मण्यम् यच्चाहितं तद्—

पण्डा —अब्रह्मण्यम् । अधुना ज्ञातम् ।

वैदिकः —सम्प्रति वदतु, कोऽनर्थो दृष्टोऽत्र यदेवं जल्पितम् ?

पण्डा —घोषणामेतां श्रुत्वा मया चिन्तित यत्केनापि (खिस्तानेनाधुनास्मकं वेदोऽपि प्राकाश्यं नीतः। घोरः खलु कलिः समायातः ! किं नास्त्ययं सुमहतः खेदस्य विषयः ?

वैदिकः —हर्षस्यैवायं विषयो न तु खेदस्य। यतोहि पञ्चषैरेव वैदिककुलैरद्यावधि धृतं ऋग्वेदसायणभाष्यमधुनास्माभिरपि लभ्यंस्यादथ च वेदमन्त्राणामर्थमपि ज्ञास्यामो वयमधुना।

शिक्षकः —परं सप्तसमुद्रपारस्थेन केनापि सायणभाष्यं शुद्धरूपेण प्रकाशितं स्यादित्यत्र तु मे मनोऽपि सन्दिहानम्।

वैदिकः —विद्यन्ते यूरोपजा अपि वेदज्ञाः। परं मोक्षमूलरस्य तु नामाप्यश्रुतपूर्वम्……

शिक्षकः —(विचिन्त्य) अहो, जातः सभायाः समयः। तत्त्वराम।

(इति निष्क्रान्ताः)

पञ्चमं दृश्यम्

स्थानम्—वाराणस्यां विद्वत्सभा।

(मञ्चे प्रमुखा विद्वांसः उच्चासनस्थः सभापतिमहोदयश्चोपविष्टः। अधस्ताच्च शतशः पण्डिताः परस्परमालपन्तो दृश्यन्ते।)

आयोजकः —सज्जनाः ! शान्तं शान्तम्। अधुनास्या विद्वत्सभायाः कार्यक्रमः समारभ्यते। तत्रादौ श्रीमान् शिवदासो वैदिकमङ्गलमाचरिष्यति।

शिवदासः —हरिः ॐ अग्ने नय सुपथा रायेअस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेमः।

आयोजकः —अधुना छात्रा सरस्वतीवन्दनां विधास्यन्ति।

(सरस्वती वन्दनां गायन्ति)

छात्राः — या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैः सदा वन्दिता
सास्मान्पातु सरस्वती भगवती निःशेषजाड्यापहा॥

आयोजकः —आदरणीयाः सभापतिमहोदयाः पूज्याः स्वामिपादा मान्या विद्वांसश्च! श्रीमता मोक्षमूलरभट्टेन सद्यः प्रकाशितस्य ससायणभाष्यस्य ऋग्वेदखण्डत्रयस्य प्रामाण्यनिर्धारणायैषा विद्वत्सभा समायोजिता। मोक्षमूलरसम्पादितस्यास्य ऋग्वेदस्य प्रथमखण्डस्य मुखपृष्ठे देवनागराक्षरैः संस्कृतभाषायां यन्मुद्रितं तदेव तावद्वाचयामि—

ऋग्वेद संहिता

सायणाचार्यविरचितमाधवीयवेदार्थप्रकाशनामकभाष्य-सहिता शर्मण्यदेशोत्पन्नेनेंग्लैण्डदेशनिवासिना भट्टमोक्षमूलरेण संशोधिता श्रीमद्भारतवर्षाधिपतीनामनुमत्या च उक्षतरणा-भिधाननगरे विद्यामन्दिरसंस्थानमुद्रायन्त्रालये मुद्रिता संवत् १९०६ वर्षे।

प्रथमाष्टकः

अथ चास्य प्रत्येकस्य खण्डस्यारम्भे वेदमहिम्नो व्यञ्जि-कया भाष्यपाठान्तरपरिचायिकया च महत्या भूमिकया पदे-पदे प्रस्फुटिता वेदेषु श्रद्धास्य सम्पादकस्य। अधुना भवत्सु कोऽपि पण्डितोऽत्रागत्यास्य ग्रन्थस्य यत्किमपि पृष्ठमेकं वाचयतु, येनास्य सम्पादकस्य वैदुष्येन महता श्रमेण च सर्वे परिचिताः स्युः।

(पण्डितः पृष्ठमेकं वाचयति)

शिक्षकः —(श्रुत्वा) सर्वथैव शुद्धं प्रतीयत एतत्।

वैदिकः —शुद्धतममिति वाच्यम्।

शिक्षकः —महतो हर्षस्याश्चर्यस्यच विषयोऽयम्।

आयोजकः —अथचात्र भाष्यगतानामुद्धरणानां मूलग्रन्थनामोल्लेख-पुरस्सरं परिचयांका अपि प्रदत्ताः। अपरञ्च—मेक्समूलरेण यदत्र स्वनाम्नः 'मोक्षमूलर' इति रूपेण संस्कृतीकरणं विहितं, तदपि सर्वथा समीचीनं सार्थकञ्चेति मन्यामहे। यतो हि—

वेदा मोक्षस्य मूलं हि तान्रात्यर्थात्प्रयच्छति।
अन्वर्थकाभिधानोऽयं विद्यते 'मोक्षमूलरः' ॥७॥

सभापतिः —एतत्सर्वमालोच्यात्र समवेताः सर्वे वयं काशीस्थाः

पण्डिताः सम्यग्विचार्य, पुस्तकमिदमाद्यन्तं परीक्ष्य च—

'मोक्षमूलरभट्टेन सम्पादितः सायणभाष्येण सहितः ऋग्वेदः सर्वथा शुद्धोऽस्तीति सबहुमानमुद्घोषयामः। प्रार्थयामश्च यत् श्रीमान् मोक्षमूलरभट्टोऽनेनैव क्रमेण समग्रमपि ऋग्वेदं प्रकाश्याखिलं संस्कृतजगत् भारतञ्चोपकृतं विदध्यादिति।' अस्य निर्णयस्यैका प्रतिः श्रीमते मोक्षमूलरभट्टाय सादरं प्रेषितास्यादित्यपि निर्णीयते।

सर्वे—जयतु जयतु विश्वनाथः। हर हर महादेव।

(इति सर्वे निष्क्रान्ताः)

द्वितीयोऽङ्कः समाप्तः

तृतीयः अंकः

प्रथमं दृश्यम्

स्थानम्—सम्राज्ञी विक्टोरियाया ओस्बोर्न प्रासादः ।

(ततः प्रविशति प्रतिहारी)

प्रतिहारीः—भो भो राजप्रासादस्याधिकारिणः चतुःषठ्यधिकाष्टादशशततमस्य खीष्टाब्दस्य जनवरीमाससाद्य षष्ठ्यां तारिकायां रात्रावष्टवादनावसरे भावी सम्राजा प्रिन्स आफ वेल्स इत्याख्येन युवराजेन अन्यैश्च सर्वैः परिजनैः परिवृता महामहिमशालिनी महामान्या सम्राज्ञी विक्टोरियास्यओस्बोर्न इत्याख्यस्य प्रासादस्य भुक्तास्थानमण्डपे' मोक्षमूलरभट्टस्य व्याख्यानं श्रोतुमाजिगमिषति । अतः सर्वै-बहुमानपुरस्सरं स्व स्व स्थाने सावधानतया स्थातव्यम् ।

(ततः प्रविशति सपरिजना सम्राज्ञी विक्टोरिया)

मूलरः—महामान्यायै अत्रभवत्यै सम्राज्ञ्यै सप्रणिपातं सादरञ्च सुसान्ध्यम् ।

विक्टोरिया—भवतेऽपि सुसान्ध्यम् । महानुभाव ! भवतो व्याख्यानं श्रोतुं वयमुत्सुकाः स्मः ।

मूलरः—अत्रभवत्या महामान्यया सुअवसरोऽयं मे प्रदत्तः, तदर्थमत्यन्तं कृतज्ञोऽस्मि ।

विक्टोरिया—तदारभ्यतां स्वप्रवचनम् ।

मूलरः—महामान्ये सम्राज्ञी ! माननीय युवराजमहोदय ! मान्याः परिजनाश्च—

"ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विज् । होतारं रत्नधातमम्" । अयमस्ति तस्य ऋग्वेदस्य प्रथमो मन्त्रः, यस्य ससायणभाष्यस्य सप्तममण्डलपर्यन्तं खण्डचतुष्टयं पूर्वमीस्ट-

इण्डिया कम्पन्यास्ततश्च भवतः सर्वकारस्यानुदानेनाद्यावधि प्रकाशितम् । स्वल्पैरेव वर्षैः सम्पूर्णे ऋग्वेदे प्रकाशिते सति न केवलं विश्वस्य प्रत्नापितु समग्रस्या आर्य जातेः श्रेष्ठतमा भारतीयार्याणञ्च पवित्रतमा महती रचना सुरक्षिता स्यात् । पूर्वन्तावदेतदेव सादरं सधन्यवादञ्च निवेदयितुकामोऽस्मि अत्र भवत्यै महामान्यायै सम्राज्ञ्यै । (एवं व्याख्यानमुपक्रम्यते)

विक्टोरिया — महानुभाव ! ऋग्वेदस्य, तस्य सायणभाष्यस्य च महिमानं प्रकटयता भवताद्य बहूपकृता वयम् । एवमेव संस्कृतभाषया सह ग्रीकलेटिनादिभाषाणां भवता कृतया तुलनयापि वयमाश्चर्याभिभूता जाताः । महानुभाव ! एतत्तु सर्वविदितमस्ति यदेषुदिवसेषु दशवर्षाणि यावदस्माभिः कस्यापि व्याख्यानं न श्रुतम् । अद्य तु घण्टाद्वयपर्यन्तं भवतो व्याख्यानं श्रुत्वा वयं तथा प्रहर्षपरतन्त्रा जाता, यथा स्वजीवने रात्रौ कदापि न त्यक्तपूर्वं शलाकावयनकार्यमपि अस्माभिरद्य विस्मृतम् । यद्यपि ऊर्णातन्तुवयनशलाकादि सर्वा सामग्री यथानियमं पूर्वमेवात्र सुसज्जीकृतासीत् । महानुभाव ! भवतो व्याख्यानस्य कार्यक्रमं पूर्वन्तु दिवसैकस्यैवासीत्, परमधुना वयं श्वोऽपि भवतो व्याख्यानं श्रोतुमभिलषामः ।

मूलरः —एतेन प्रोत्साहकेनाशीर्वचसात्यन्तमनुगृहीतोऽस्मि—अत्र भवत्या महामान्यया सम्राज्ञ्या । सप्रणिपातं सधन्यवादं च महामान्यायै सम्राज्ञ्यै शुभं नक्तम् ।

विक्टोरिया—शुभं नक्तम् ।

(इति सर्वे निष्क्रान्ताः)

द्वितीयं दृश्यम्

स्थानम्—आक्सफोर्ड विश्वविद्यालयस्य प्रांगणस्थं मोक्षमूलरसद्म ।

(ततः प्रविशतः पियानोवादनपरः मोक्षमूलरःस्तस्य पत्नी जार्जिना च ।)

जार्जिना—हृद्या खल्वेषा मूर्च्छना !

मूलरः —प्रिये ! तव संगीतसुधालहर्या मधुरतरञ्जायते मे वाद्यम्।

जार्जिनाः —सङ्गीतकला कुत आसादिता प्रिय ! त्वया ?

मूलरः —पूज्यो मे पिता पियानोवादनपटुरासीदिति श्रूयते । मातापि संगीतविशारदास्तीति तु जानास्येव।

जार्जिनाः —एवम् । मया तु चिन्तितं यदुद्वाहात्पूर्वं काप्यासीत्ते ······

मूलरः —अवश्यम् । प्रत्यहं सा विहारानन्दं मे प्रायच्छत् । साचासीदेका सदश्वा ।

जार्जिनाः —(सस्मितम्) । अपह्नुतिरेषा खलु ······

(ततः प्रविशति केशवचन्द्रः सेनः)

श्रीसेनः —बहुकालो जातोऽत्र भवतामातिथ्यसौख्यमनुभवतो मे। अधुना पुनः भारतं प्रस्थातुं कामयेऽपि च······

(ततः प्रविशतः रामीदासच्छबीलदासः श्यामजीकृष्णवर्मा च)

रामश्यामौः —नमस्ते महाशय !

मूलरः —भवद्भ्यामपि सुप्रभातम् ।

श्यामजीः—अहो ब्रह्मसमाजस्य मान्यो नेता केशवचन्द्रसेन महोदयोऽप्यत्रैव विराजते।

श्री सेनः —आंग्लदेशे विद्यमानोऽहं प्रायेणात्रैव निवसामि।

जार्जिना—आत्मीयता खल्वेषा सेनमहोदयस्य ।

मूलरः —जार्जिने ! एषो रामजीदासच्छबीलदासोऽद्यत्वे केम्ब्रिजविश्वविद्यालयेऽधीयानः । अयञ्च श्यामजीकृष्णवर्मात्र बेरिष्टरीमधिजिगमिषति। श्रीमत्स्वामिदयानन्दसरस्वतीपादानां सच्छिष्यावेतौ संस्कृतप्रचारनिरतावत्रापि।

श्यामजीः —विद्वद्वर ! मद्गुरुवर्य श्रीस्वामिपादानां पत्रमधिगतमद्यैव। तत्र तैः 'स्वऋग्वेदभाष्यविषयेऽत्र भवतामभिमतं जिज्ञासितम्।'

जार्जिना—श्रीमद्दयानन्दविरचितभाष्यसहितस्य मासिकरूपेण प्रकाशितचरस्य च ऋग्वेदस्यायं मे भर्ता प्राथमिको ग्राहकोऽस्तीत्यवगन्तव्यं भवद्भिः ।

मूलरः—यथा महात्मना बुद्धेनोपनिषदां गोपनीयमपि रहस्यजातं सर्वेभ्यः प्रकाशितं तथाद्यत्वे स्वामिदयानन्दसरस्वतीपादाः वेदमन्त्रार्थान् सर्वेभ्यः प्रकाशयन्तीति मे मतम् । अथ च स्वामिपादानां जीवनचरितमपि प्रकाशितमनेन जनेन ।

जार्जिना—मम भर्तुर्विषये भारते विविधा वार्ताः...

रामजी—सत्यं वदत्यत्रभवती । तत्र त्वेषोऽपि प्रवादः श्रूयते, यत् क्रिश्चियन मतस्य प्रचारपरायण एवास्ति मोक्षमूलरो वेदव्यपदेशेन ।

श्री सेनः—भारते केचिज्जना प्रवदन्तु किमपि । विपरीतमतो तथ्यन्त्वेतद्विश्वविदितमस्ति यदुपरते श्री विल्सने मोक्षमूलरो हिन्दूधर्ममनुमन्यते नतु क्रिश्चियनमित्याकलय्य ऑक्सफोर्डविश्वविद्यालयस्य संस्कृताचार्यपदे निर्वाचितो नाभूदयम् ।

मूलरः—पश्चाच्च विश्वविद्यालयेऽनानेनैव तुलनात्मकभाषाविज्ञानाचार्यपदं मह्यमर्पितम् । मया तु तेन पदेन संस्कृतसेवायां व्यवधानो दृष्टः । ततश्च—

प्रभुद्वयं पुमानेकः सेवितुं न किलार्हति ।
इति कृत्वा पदं श्रेष्ठमपि त्यक्तं मया पुनः ॥६॥

रामजी—संस्कृतकार्यार्थं कोऽन्य एतादृशं त्यागं कुर्यात् ?

मूलरः—सेनमहाशय ! भवतापि संकीर्णताकोपमनुभूयतेऽद्यत्वे ।

श्री सेनः—सत्यम् । ममावयस्कायाः सुतायाः कूचबिहारनरेशेन सह भाविनं विवाहमुद्दिश्य भारते मम विरोधे वितण्डारब्धा ममानुयायिभिर्ब्रह्मसमाजसदस्यैरेव । अतएव मया सत्वरमेव भारतं प्रस्थातव्यमधुना ।

जार्जिना—(**सस्मितम्**) सेन महाभाग ! अस्या साम्प्रदायिकसंकीर्णतायाः कोपं तु वयं सदैवानुभवामः । यथा हि मूलरस्य क्रिश्चियनमते आस्था श्लथेति मन्वानेन मम पूज्यपित्राऽऽवयोर्विवाहो वर्षषट्कं यावन्नानुमत इत्यप्यवगन्तव्यं भवद्भिः ।

मूलरः—श्यामजी ! अस्ति स्वामिपादानामपि मद्विषये काचिद् धारणा ?

श्यामजी —(विहस्य) स्वामिदयानन्दसरस्वतीनां त्वेत्कथनमस्ति यन्मोक्षमूलरोऽद्यापि वेदविद्यायां बालक एव।

मूलरः —(साट्टहासम्) सत्यमेवैतत् । वेदविषयेत्वात्मानं बालकमेव मन्ये।

रामजी —भवतां भारतागमनस्य प्रतीक्षापि क्रियते स्वामिपादैः।

जार्जिना —सुष्ठु स्मारितम् । श्रीमतो डीन स्टेनले महोदयस्य प्रयत्नेन प्रिंस आफ वेल्स महोदयस्यागामिन्यां भारतयात्रायां तदनुयायिवर्गे मम भर्तुर्नामापि सन्निवेशितम्। स्वल्पैरेवाहोभिर्भारतयात्रा सम्पत्स्यतेऽधुनास्य।

श्री सेनः रामजी श्यामजी च —(सहर्षम्) वयमप्यस्य सध्र्यंचो भविष्यामोऽधुना।

(पत्रहारकः प्रविश्य पत्रं प्रयच्छति)

जार्जिना —(पत्रं गृहीत्वा दृष्ट्वा च) एतत्तु श्रीमतो डीन महोदयस्यैव पत्रम्। नूनं तेन तत्कालमाहूतःस्यान्मे भर्ता लन्दन नगरं, भारत प्रस्थानाय।

मूलरः —(सहर्षम्) पठतु, तावत्। किं लिखति तत्रभवान् ?

जार्जिना —(पत्रं वाचयित्वा सोद्वेगं) हन्त ! सर्वमेव विपरीतं वृत्तम्।

श्री सेनः —(साश्चर्यम्) किं जातम् ?

मूलरः —(पत्रं गृहीत्वा पठित्वा च) अहो ! प्रिंस आफ वेल्स महोदयस्य राजकीय भारतयात्रायां कोऽपि वैदेशिकः सम्मिलितुं नार्हतीति' व्यपदिश्य केनापि विघ्नसन्तोषिनाधिकारिणा मम नाम सूची तो निष्कासितमिति' सखेदं सूचितं तत्रभवता स्टेनले महाभागेन। अथवैतत्तु दृश्यत एव—

संकीर्णता तु लोकानां राष्ट्रवर्गमतादिजा।
विधत्ते प्रत्यवायं हि मानवोन्नति साधने।२।

परं भवद्भिः नात्र खेदः कार्यः। यतो हि—

अत्रागतैर्भवादृशैर्महानुभावैर्मित्राणां पत्राचारैः पत्रपत्रिकाभिः पुस्तकादिभिश्च भारतन्तु मया सम्यगवगतमेव। तत्र गत्वापि नाभविष्यन्मे भारतज्ञाने कापि वृद्धिः। अत्र स्थित एवाहं काशि

विश्वनाथघण्टाध्वनिं प्रत्यहं शृणोमि । तथापि—

भारतस्यांग्लदेशस्य सर्वेषां विदुषां तथा ।
लाभ एवाभविष्यच्चेदगमिष्यं सुभारतम् ॥३॥

सुता: —(प्रविश्य)—तात ! व्यत्यैति खल्वाहारवेला ।

जार्जिना: —जाते ! विविधवार्ताव्यापृततया विस्मृता भोजनवेलाप्यद्य । सर्वैरधुना भोजनायोपस्थातव्यम् ।

(इति निष्क्रान्ता: सर्वे ।)

तृतीयं दृश्यम्

स्थानम्—आक्सफोर्ड विश्वविद्यालयस्य प्रांगणे मोक्षमूलरसद्म ।

(ततः प्रविशति जार्जिनया सुतेन सुतया च सहितो मोक्षमूलरः)

मूलरः —प्रिये ! भारतीयाः प्रतिदिनमागत्यास्माननुगृह्णन्तीति हर्षस्य विषयः। परमद्य तु महोत्सव एव भविष्यति ।

जार्जिना —भवता सह प्रत्येको दिवस उत्सव एवास्ति मे...

मूलरः —अद्य खलु श्रीस्वामिविवेकानन्द पादा मे निमन्त्रणमनुरुन्धाना लन्दनतोऽस्माकं गृहं पावयितुमागमिष्यन्ति ।

जार्जिना —परममेतत्सौभाग्यमस्माकम् ।

मूलरः—(विलोक्य) स्टर्डीमहोदयेनानुगम्यमानाः स्वामिपादा आगच्छन्त्येव, तत्सभाजायम ।

मूलरः —(अग्रे गत्वा, सप्रश्रयम्)

कुटीरमद्य मे प्राप्ताः पुनाना अखिलं जगत् ।
विवेकानन्दपादा हि कृतकृत्योऽस्मि साम्प्रतम् ॥४॥

जार्जिना —

वेदवेदान्तसन्देशं श्रावयन्तं जगत्त्रयम् ।
जङ्गमं भारतं वन्दे विवेकानन्दरूपिणम् ॥

विवेकानन्दः —ॐ नमोनारायणाय। कल्याणमस्तु। पुण्यशीले! महदेव तपस्तप्तं भवत्या पूर्वजन्मनि।

जार्जिना —महात्मन्! न केवलं पूर्वजन्मन्यपित्वस्मिञ्जन्मन्यपि षड् वर्षाणि प्रतीक्षाजनित तापं तप्त्वैव…

मूलरः —(सस्मितम्) आवयोरुद्वाहेनैकसूत्रता जातेति वाक्यशेषः।

(सर्वे हसन्ति)

विवेकानन्दः —वेदज्ञवर! भवता स्वयौवनारम्भे त्रयोविंशतितमे वर्षे सायणभाष्यसहितस्य ऋग्वेदस्य सम्पादनं मुद्रापणञ्चारब्धम्। तच्च एकोनपञ्चाशत्तमे वर्षे समाप्तिमगात्। इत्यहं जानामि।

मूलरः —स्वामिपादा अपि च चरमे वयसिविद्यमानस्य मेऽधुना नास्ति तथाविधा शक्तिस्तथापि—

प्रकाशनाय वेदस्य रम्यं संस्करणं नवम्।
विजयनगराधीशः प्रायच्छत्पुष्कलं धनम् ॥६॥

अतएवाधुना सम्यक् सम्पाद्य संशोध्य च विशालाकारपृष्ठानां खण्डचतुष्टयेन ससायणभाष्यस्य ऋग्वेदस्य द्वितीयसंस्करणस्य प्रकाशनमारब्धम्।

विवेकानन्दः —पूर्वं विजयनगरस्यैव सम्राजा कृष्णराजद्वितीयेनाचार्य सायणः ऋग्वेदस्य भाष्यनिर्माणायाधुना च तस्यैव विजयनगरस्यमहाराजेन सायणभाष्यस्य सुरम्यरूपेण पुनः प्रकाशनाय भवांश्च प्रेरित इति तु युज्यत एव।

मूलरः —अथ चानेन विजयनगरमहाराजानुदानेन—

उदाराः कर्मशूराश्च वाक्शूरा न हि केवलम्।
विद्यन्ते भारतीया हि ज्ञातं सर्वैर्जनैरिह ।७।

स्टर्डी—सायणभाष्यसहितस्य ऋग्वेदस्य द्वितीयसंस्करणस्य प्रकाशनार्थैकेन भारतीयेन विजयनगरमहाराजेन द्रव्यं दत्तमिति तु युज्यते। परमस्य प्रथमसंस्करणस्य प्रकाशनायेस्टेण्डिया कम्पनी कथं प्रावर्तत? इत्यस्तिजिज्ञासितम्।

मूलरः —सम्यक् पृष्टम् ।

सायणभाष्यस्य प्रकाशनाय श्रीवर्नूफमहोदयेन मयाचानेकत्र प्रयतितम् । श्रीमताचार्यबॉथलिंग्कमहोदयेन सूचितं यत् सः पिटर्सवर्ग अकादमीतः ससायण-भाष्यं ऋग्वेदं प्रकाशयितुमुद्यत परन्तु मम नाम्ना सह तस्यापि नाम सम्पादकरूपेण प्रकाशयिष्यते । तच्च मया न स्वीकृतम् । श्रीमता वॉप्पमहोदयेनापि र्बलिनतः सायणभाष्यप्रकाशनायोत्साहः प्रदर्शितः । परं तेन लिखितं यत् सम्पूर्णोभाष्यस्तु बृहदाकारोऽस्ति । तस्य संक्षेपो विधातव्यः । मयैतदपि न स्वीकृतम् । तदैवाहमिण्डिया-हाउस-स्थितानां भाष्यपाण्डुलिपिनामध्ययनाय लन्दनमगच्छम् । तत्रांग्लदेशस्थः प्रशियाराजदूतः परमप्रभविष्णुः सुगृहीतनामधेयो मम पितुमित्रः तेनैव क्रमेण च ममापि परिचितः बुन्शेन महाभागस्तदा लन्दन एवासीत् ।

स्टर्डी —एवमेवम् ।

मूलरः —सायणभाष्यस्य प्रकाशनस्य मम योजनां श्रुत्वासौ महाभागो मुमुदेतराम् । 'कम्पनी व्यतिरिक्तं केनचिदन्यदेशीयेन सर्वकारेण भारतस्यायं गौरवग्रन्थश्चेत् प्रकाशितः स्यात्तदा कम्पनीकृते लज्जाया एव विषयोऽभविष्यदिति' कृत्वा प्रेरिताः श्रीबुन्शेन महाभागेन कम्पनीनिदेशकाः योजनां मे कार्यरूपे परिणमयितुम् । समारब्धे भाष्य प्रकाशन कार्ये च केवलं द्विवारं वर्षद्वयस्याभूद्व्यवधानम् ।

स्टर्डी —को व्याघातो जातः ?

मूलरः —प्रथमं भारते सैन्यविद्रोहवशादीस्टेण्डियाकम्पन्यधिकारिणो भाष्यप्रतिलिपिनां प्रेषणेऽसमर्था अभवन् । एकदा च जाते पोतभंगे भारतादानीयमानाः पाण्डुलिपयः सागरे सञ्जाताः ।

जार्जिना —तदेवम्—

पञ्चविंशतिभिर्वर्षैस्तद्गतेनान्तरात्मना ।
अतन्द्रितेन मे भर्त्रा ऋग्वेदोऽभूत् प्रकाशितः ॥८॥

स्टर्डी —रुचिरा साहसिका सुदीर्घकालव्यापिनी चैषा वेदकथा ।

विवेकानन्दः —सत्यम्—

एषा वेदकथा नूनमद्भुता सरसा नवा।
श्रावं-श्रावं वेदवृत्तं जायते पुलकोद्गमः ॥९॥

जार्जिना —अनेन मम स्वामिना तु लोकमान्य तिलकायापि ऋग्वेदस्य खण्डषट्कमुपहाररूपेण प्रेषितम्।

मूलरः—अद्भुतं खलु तिलकस्य पाण्डित्यम्। तस्य वेदकाल निर्णायिकां ओरायन मृगशीर्ष (orian) इति नाम्ना विख्यातां लघीयसीं पुस्तिकामवलोक्य जाता मे मनसि श्रद्धा तस्मै विद्वद्वराय।

जार्जिना —अथ च पत्रपत्रिकासु लेखजातं लिखित्वा इल्बर्ट विधेयकस्यापि भूयसा प्रयत्नेन समर्थनं विहितमनेन मे स्वामिना। यद्यपि सर्वैरांग्लैर्विधेयकस्यास्य प्रबलो विरोधः कृतः।

मूलरः —भारते स्थितवतामांग्लाधिकारिणामभियोगश्रवणाधिकारोऽधिगतो भारतीयन्यायाधीशैरनेनेल्वर्ट विधेयकेन।

विवेकानन्दः —विद्वद्वर ! भारतमस्मान् किमुपदिशतीति पुस्तकं भवतो भारतभक्त्याद्यन्तमाप्लावितं वर्तते। तदधुना भवान् भारतं कदागमिष्यति ?

मूलरः —स्वामिमहोदय ! अत्र विषये एतदेवास्मिवक्तुकामः—

वाराणस्यां निवासश्च गङ्गाम्भसि निमज्जनम्।
वेदवेदान्तपाठश्च त्रयमेतत् प्रियं मम ॥

अथ च (सगद्गदम्)

भूयो नात्रागमिष्यामि यास्यामि यदि भारतम्।
तत्रैव दाहसंस्कारः कर्तव्यो मे भवादृशैः ॥११॥

स्यान्नाम यावत् कानिचिन्नवीनानि पुस्तकानि कक्षान्तरात् समादायागच्छामि, तावदेतत्पुस्तकजातमवलोकनीयमत्र-भवद्भ्याम्। (इति प्रस्थितः)

स्टर्डी—पुस्तकप्रचय एषो मोक्षमूलरविरचितः सम्पादितो वा। यथाहि—एतदस्ति मोक्षमूलरसम्पादितं ऋग्वेदखण्डषट्कम्। अयञ्चास्यैव द्वितीयसंस्करणस्य प्रथमः खण्डः। एषः पुरातन संस्कृत साहित्येतिहास एतच्च संस्कृतव्याकरणम्। एतत्सानुवादं

सटिप्पणञ्च ऋग्वेदप्रातिशाख्यम् । एतानि च सेक्रेड बुक्स आफ ईस्ट इत्याख्यग्रन्थमालाया पञ्चाशत्खण्डानि । एतच्च चिप्स फ्राम जर्मन वर्कशॉप इत्याख्यं लेख संकलनम् । इत्याख्य ग्लासगो विश्वविद्यालये गिफ्फोर्ड व्याख्यान मालायां प्रदत्तानां भाषणानां पुस्तकरूपेणमुद्रितं एन्थ्रापोलोजिकल रिलीजन, फिज़ीकल रिलीजन खण्ड त्रयम् एषा च अस्य महानुभावस्यात्मकथा । एतच्च आई० सी० एस० पदेनियुक्तानां भारतीयशासकपदं गृहीतुं जिगमिषूणामांग्लाधिकारिणां प्रबोधनाय भारतस्य वास्तविकरूपस्य परिचयप्रदानाय प्रदत्तानां व्याख्यानानां। इण्डिया ह्वाट इट केन टीच अस इति नाम्ना प्रकाशितं संकलनम् । एतच्च दी वेदान्त फिलॉसफी नामकं विख्यातं पुस्तकम् ।

विवेकानन्दः—मोक्षमूलरस्य तु समस्तमेव जीवनं संस्कृतानुरागमनुकरणीयाञ्च भारतभक्ति व्यनक्ति । यादृशेन भारतप्रेरणाप्लावितोऽयं तस्य शतांशमप्यस्माभिर्लब्धं स्यात् । अपरा विद्यया परां विद्यामधिजिगमिषतोऽस्योपनिषत्तत्त्वज्ञस्य वेदविदुष आवासं प्राप्यैवमनुभवामि यद् वसिष्ठस्यारुन्धतेश्चाश्रमपदमेवागतोऽहमधुना ।

स्टर्डी—मयाप्येवमेवानुभूयते ।

विवेकानन्दः—स्टर्डीमहाभाग ! दृष्टं भवद्भिर्भारतागमनस्य चर्चायामुपस्थितायां मोक्षमूलरस्य नेत्रद्वयमश्रुसिक्तंजातम् । नूनमनेन पूर्वजन्मनि केनापि पण्डितेन भाव्यम् :—

"तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ।"

मूलरः—(प्रविश्य) अहो ! कालिदासः स्मर्यते—

"रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितोऽपि जन्तुः ।"

स्टर्डीमोक्षमूलरौ—तच्चेतसा स्मरतिनूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि ।

जार्जिना—स्टर्डीमहोदयोऽपि संस्कृते प्राविण्यं भजते ?

स्टर्डी —अथ किम्। मया भारत एवाधीता संस्कृत भाषा । स्वामिपादानां सान्निध्येन च समृद्धतरं जातं मे संस्कृतज्ञानम् ।

विवेकानन्दः —महाभाग ! अद्यत्वे खलु विश्वस्मिन्नपि विश्वे पूज्यन्ते मे गुरुवः श्रीपरमहंसपादाः ।

मूलरः —युज्यत एवेतद् । यतो हि—

रामकृष्णं महात्मानं प्रत्यक्षं धर्मविग्रहम्।
विहाय कोऽन्यः पुरुषः पूजनीयो भवेदिह ॥१२॥

एतदस्ति मे नवीनं प्रियञ्च पुस्तकम् पश्यन्तु स्वामिपादाः ।

विवेकानन्दः—(**विलोक्य**) अहो ! एतत्तु मम गुरुवर्य पूज्य परमहंस पादानां भवता लिखितं जीवनचरितम् । सुतरां प्रीतोऽस्म्यनेनाहम्, महानुभाव ! किमत्रभवते प्रत्युपकरोमि ?

